শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী গরুডতন্ত্রে হনুমৎকল্পে ঈশ্বর প্রোক্তং

# ॥ শ্রী হনুমৎস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হনুমৎস্তোত্রম্ ॥

অত্যুৎকটপ্রকটিতাতুলধৈর্যৱর্যঃ
শ্রীরামকার্যকরণে প্রথিতৈকৱীরঃ।
গৎৱা ৱিলঙ্ঘ্য গতৱারিধিৱারিতীরঃ
শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **1** ॥

যো জাতমাত্রসমযে বলৱান্ গভস্তে -
র্বিম্বং নিরীক্ষ্য ফলমিত্যৱিচার্য সম্যক্।
জগ্রাহ পাণিযুগলে সহসা মুমোচ
শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **2** ॥

বিভ্রৎসদা ৱপুষি ৱজ্রচযে বলীযান্
তেজঃ সহাযসমযং প্রকটীচকার।
লঙ্কাং দদাহ দশৱক্ত্রসভাসমক্ষং
শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **3** ॥

রামানুজে মহতি যো জগতীতলেঽস্মিন্
শক্ত্যা হতে রণমুখে দশকন্ধরেণ।
আনীয ভেষজমজীৱযদেৱমাশু
শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **4** ॥

মুদ্রাং সমর্প্য রঘুনন্দননামচিহ্নাং
চূডামণিং জনকরাজসুতাগতং তম্।
আনীয রামমভিৱেদযতি স্ম ৱীরঃ
শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **5** ॥

নিঘ্নন্নশোকৱনভূরুহরক্ষপালান্
    ভঞ্জন্ মহাবহুপশূংশ্চ শতং সহস্রান্।
ভুঞ্জন্ ফলানি ৱিৱিধানি হি ৱীক্ষ্য সীতাং
    শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **6**॥

কারাগৃহে মনসি চিন্তিত এৱ যস্মিন্
    বদ্ধো জনো হি লভতে তত আশু মোক্ষম্।
ক্রৱ্যাদযক্ষপৱনাদিভযাপহারী
    শ্রীমানসৌ জযতি ৱাযুসুতো হনূমান্॥ **7**॥

তুভ্যং নমঃ সকলমঙ্গলদাযকায
    তুভ্যং নমোঽস্তু পৱনানলসম্ভৱায।
তুভ্যং নমোঽস্তু জগতাং পরমোপকর্ত্রে
    সর্ৱার্তদুঃখহরণায নমো নমস্তে॥ **8**॥

ইদং হনূমতঃ স্তোত্রং মহাপাতকনাশনম্।
সঙ্গ্রামজযদং পুণ্যং দেৱানামপি দুর্লভম্॥ **9**॥

যঃ পঠেৎ প্রাতরুত্থায স্নানে ৱা শযনেঽথৱা।
ৱিষং ন বাধতে তস্য ন তং হিংসন্তি হিংসকাঃ॥ **10**॥

ৱিদ্যার্থী লভতে ৱিদ্যাং ধনার্থী লভতে ধনম্।
পুত্রার্থী পুত্রমাপ্নোতি নারী পত্যুঃ প্রিযা ভৱেৎ॥ **11**॥

রোগী রোগাৎপ্রমুচ্যেত বদ্ধো মুচ্যেত বন্ধনাৎ।
দুর্বলো বলমাপ্নোতি ভৱেদ্ৱাযুসুতোপমঃ॥ **12**॥

ৱিঘ্নাঃ সর্ৱে পলাযন্তে
    তং দৃষ্টৱা নাত্র সংশযঃ।
সঙ্গ্রামে ৱ্যৱহারে চ

ৱিজযস্তস্য জাযতে।
বন্ধনান্মুক্তিমাপ্নোতি
যাত্রাযাং সিদ্ধিরেৱ চ॥ **13**॥

॥ শ্রী হনুমৎস্তোত্রং সমাপ্তম্॥